Postal Regd.No. GAMC- 1553/2016-2018 ISSN 2454-6313

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १२ अङ्क : १४१
फेब्रुआरी - २०१८

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2016-2018 issued by SSP Ahmedabad. Valid upto 31-12-2018. containing 8 pages ₹ 10

## चिन्तनम्

### विशिष्टं चिन्तनं प्रति

यत् अधीतं चिन्तनं प्रति न प्रेरयति, तत् मद्यपानम् इव व्यसनमात्रम् अस्ति ।

-----

ये मनुष्याः वृथा परिश्रमं कुर्वन्ति, ते तु स्वीयम् आलस्यम् एव अलङ्कुर्वन्ति ।

-----

शिशुः न सत्यं जानाति, न च असत्यम् । सः तु केवलं जानाति ।

-----

चिन्तने परिश्रमः अपेक्षितः, अतः मनुष्यः प्रायः परचिन्तनेन कार्यं साधयति ।

-----

संसारस्य गतिः विचित्रा दृश्यते । कठिनाः मूर्तयः मोदकानि धारयन्ति, कोमलाः च बालकाः रोटिकायाः खण्डार्थं वीथिषु अटन्ति ।

-----

विश्रामः अर्थात् द्वयोः परिश्रमयोः मध्ये शोभमानं दिव्यम् अन्तरालम् ।

-----

वैयाकरण ! मम काव्यं मा स्पृश । त्वं शब्दस्य शल्यचिकित्सकः, अहं तु अर्थस्य उपासकः ।

-----

प्रभो ! सुन्दरीं दिनदर्शिकां कोऽपि धनिकः मह्यं दास्यति । त्वं सुन्दरान् दिवसान् देहि ।

-----

कस्यचित् उज्ज्वलं मृत्युं दृष्ट्वा अहं ज्ञातवान् यत् जीवनं क्षुल्लकम् अस्ति ।

-----

यः अज्ञानस्य विस्तारं सम्यक् जानाति सः महान् ज्ञानी अस्ति ।

-----

भवान् यावत् केवलं विचारं करिष्यति तावत् बहूनि मित्राणि समीपे स्थास्यन्ति । परन्तु यदा आचरणं करिष्यति तदा एकाकी भविष्यति ।

-----

कश्चित् चोरयति तदा ज्ञायते यत् धनं तु मृगजलमात्रम् आसीत् । मृत्युकालेऽपि तथैव स्यात् ?

-----

यौवने जलसेचनं न कृतम् । अथ अधः पतितानि शुष्काणि पर्णानि इतस्ततः चिनोमि ।

-----

क्षुल्लकाः बहवः शोकाः भवन्तं मूर्खः इति घोषयन्ति । किन्तु कश्चित् घनः शोकः विशिष्टं चिन्तनं प्रति प्रेरयति ।

-----

शवं दृष्ट्वा विलापं मा कुरु । जीवनस्य सारहीनं प्रत्येकं क्षणं शवम् अस्ति ।

-----

गाढं तिमिरं भित्त्वा स्फुरन्ती सा विद्युत् निश्चयेन बलवती अस्ति । तथापि अन्धतमसे कस्मिंश्चित् कुटिरे निभृतं प्रज्वलन् अयं दीपः मम चित्तं हरति ।

✍ सतीशः गज्जर

# यदि शिक्षकाः दीपायेरन्



एषा घटना अस्मद्देशस्य राष्ट्रपतेः ए.पि.जे. अब्दुल्कलामस्य जीवनतः उद्घृता । भारतस्य स्वातन्त्र्यस्य अनन्तरम् अधिकः कालः अतीतः न आसीत् । पञ्चायतसभायाः निर्वाचनम् आसन्नम् आसीत् । कलामस्य पिता जनाब् अबुल् फकीर जैनुलाबदीनः रामेश्वरप्रदेशतः चितः आसीत्। तस्यैव अध्यक्षपदप्राप्तिः निश्चितप्राया आसीत्। सः चितः आसीत् यत् तत्र कारणं तदीया योग्यता एव, न तु जातिः आर्थिकस्थितिः वा।

अथ कदाचित् अब्दुल्कलामः दीपस्य पुरतः उपविश्य पठन् आसीत् । तदा द्वारताडनशब्दः कश्चित् श्रुतः । कलामः द्वारम् उद्घाटितवान् । कश्चित् आगन्तुकः अन्तः आगतवान् । सः कलामम् अवदत् यत् अहं भवतः पित्रे कमपि बन्धं दातुम् इच्छामि इति । तदीयः पिता सायङ्कालीनप्रार्थनार्थं गतः आसीत् । माता अपि प्रार्थनार्थं गता आसीत् । अतः कलामः अवदत् यत् बन्धं मञ्चस्य उपरि स्थापयित्वा गच्छतु भवान् इति। आगन्तुकेन तथैव कृतम्।

प्रार्थनामन्दिरतः प्रत्यागतः पिता मञ्चस्थं बन्धं दृष्ट्वा अपृच्छत् – "किम् एतत् ? केन स्थापितम् अत्र ?" इति।

"कश्चित् आगत्य एतदत्र स्थापयित्वा गतवान्" इति अवदत् कलामः । पिता तं बन्धम् उद्घाटितवान् । बन्धे महार्घा वेष्टी, राङ्कवं, फलानि, मधुरभक्ष्याणि, काचित् चिटिका च आसन्। एतत्सर्वं दृष्टवान् पिता नितरां क्रुद्धः सन् पुत्रं बहुधा ताडितवान्। तदा तस्य पत्नी तत्र आगत्य – 'यत् प्रवृत्तं तत्र एतस्य दोषः नास्ति' इति वदन्ती ताडनं निवारितवती। तदा पिता एकं पद्यम् उदाहरन्  अवदत् – "भगवान् एव कञ्चित् कस्याञ्चित् स्थितौ स्थापयति। तस्मै यद्यत् आवश्यकं तत्सर्वं स एव व्यवस्थापयति। तस्मात् अतिरिक्तं यदि किमपि स्वीक्रियते तर्हि तत् पापाय। एतादृशम् उपायनं केनचित् स्वार्थेन दीयते। अतः एतादृशस्य स्वीकारः पापाय" इति।

अब्दुल्कलामः पितुः एतेन व्यवहारेण न रुष्टः । प्रत्युत 'मया उत्तमा नीतिः प्राप्ता अद्य' इति अचिन्तयत् सः । एषा घटना तस्य मनसि स्थिरतया अतिष्ठत्।

अन्या काचित् घटना तदीयस्य जीवनस्य दिशाम् एव पर्यवर्तयत्। सः यदा अष्टमकक्ष्यायाम् आसीत् तदा प्रवृत्ता घटना एषा । सुब्रह्मण्यैय्यर्नामकः कश्चन अध्यापकः आसीत् तस्य । अब्दुल्कलामस्य दृष्ट्या अत्युत्तमेषु अध्यापकेषु अन्यतमः सः ।

कदाचित् सः 'पक्षिणः कथं डयन्ते' इति पाठयन् आसीत् । सः कृष्णफलके कञ्चित् पक्षिणम् अलिखत् । पक्षपुच्छशिरश्शरीरादयः सम्यक् लिखिताः तेन । पक्षिणः कथं शरीरम् उन्नयन्ति, कथं डयन्ते, डयनकाले एव दिक्परिवर्तनं कथं कुर्वन्ति, पक्षचालनं विनैव कथं डयन्ते इत्यादिकं सः विवृतवान्। बालाः सश्रद्धं तस्य कथनं शृण्वन्तः आसन् । कक्ष्यायाः अन्ते सः अपृच्छत् – "पक्षिणः कथं डयन्ते इति किं ज्ञातम् ?" इति । कक्ष्यायां क्षणकालं मौनं प्रसृतम् । ततः अब्दुल्कलामः उत्थाय अवदत् – "मया स्पष्टतया न अवगतम्" इति । अध्यापकः अन्यान् छात्रान् अपश्यत्। तेषां मुखे अपि अनवगतिभावः एव दृश्यते ! एतस्मात् अध्यापकः न खिन्नः, न वा क्रुद्धः । सः अवदत् –

"सायं वयं समुद्रतीरं गच्छाम।"

सायं समुद्रतीरे तैः निश्चलतया आकाशे डयमानाः पक्षिणः अदृश्यन्त। तेषां पक्षचालनं कथं भवति, पुच्छबलेन तैः कथं गमनदिक् परिवर्त्यते इत्यादीन् सः पुनः विवृतवान्। पक्षिणां गतिम् अनुकृत्य एव विमाननिर्माणं कृतम् इत्यपि सः अवदत्। ततः प्रत्यागमनसमये सर्वे बालाः विमानसञ्चारस्य विषये किञ्चित् ज्ञानं प्राप्तवन्तः आसन्। एषः प्रात्यक्षिकः पाठः आसीत्। यत् घण्टाभ्यन्तरे अपि विवरीतुं न शक्तम् आसीत् तत् पादघण्टाभ्यन्तरे एव समुद्रतीरे अवगमितम् आसीत् अध्यापकेन। अब्दुल्कलामः वदति– 'शिवसुब्रह्मण्यैय्यरः कश्चन बद्धश्रद्धः अध्यापकः' इति।

ततः गृहं प्रत्यागतः अब्दुल्कलामः निसचिनोत् यत् यदि अवसरः प्राप्येत तर्हि मया विमाननिर्माणतन्त्रज्ञानम् एव अध्येतव्यम् इति। स्वजीवनस्य दिशां सः तदैव निर्णीतवान् आसीत् इति यदि वदेम तर्हि नात्युक्तिः सा। केषाञ्चित् वर्षाणाम् अनन्तरं सः 'मद्रास् इनस्टिट्युट ऑफ टेक्नोलोजी' नामिकां संस्थां यदा प्रविष्टवान् तदा वैमानिकशास्त्रम् एव अध्ययनस्य मुख्यविषयत्वेन चितवान्। एवं यदा सः त्रयोदशवर्षीयः आसीत् तदैव तदीयस्य जीवनस्य दिक् निश्चिता आसीत्।

डि.आर्.डि.ओ. इत्यस्याः संस्थायाः वैमानिकाभिवृद्धिविभागे १९५८ तमे वर्षे बेङ्गलूरुनगरे आसीत् अब्दुल्कलामः। तदा प्रवृत्ता घटना एषा। तत्समये कलामवर्यः बाह्याकाशनौकायाः निर्माणे रतः आसीत्। अर्धभ्रमणपुरस्सरं विमानं प्रेरयितुं समर्थस्य यन्त्रविभागस्य आवश्यकता आसीत् तत्र। सः तस्य निर्माणं न जानाति स्म। अन्यविधस्य अभिप्रेरकयन्त्रभागस्य निर्माणं जानाति स्म सः। अधिकारिभिः सूचितं यत् भारतीयविज्ञानभवने कार्यं कुर्वतः डा. सतीशधवनवर्यस्य मार्गदर्शनम् अत्र लाभाय स्यात् इति। तस्मिन् काले धवनवर्यः वैमानिकसंशोधनक्षेत्रे ख्यातनामा आसीत्।

उच्चाधिकारिणः अनुज्ञां प्राप्य कलामवर्यः धवनवर्यसमीपं गत्वा स्वस्य समस्यां न्यवेदयत्। तदा डा. धवनवर्यः अवदत् – "यदि प्रतिसप्ताहं शनिवासरे मत्समीपम् आगम्येत तर्हि षण्मासाभ्यन्तरे अहं तादृशस्य अभिप्रेरकयन्त्रभागस्य निर्माणतन्त्रज्ञानं बोधयितुं शक्नुयाम्" इति। डा. कलामवर्येण एतत् अङ्गीकृतम्। ततः धवनवर्यः सुपरिष्कृतां पाठ्ययोजनां सज्जीकृतवान्। पूरकसाहित्यम् अपि सज्जीकृतानि तेन। कक्ष्यां प्रति आगमनात् पूर्वं किं किं पुस्तकं पठनीयम् इत्यपि सः सूचयति स्म। तावदेव न, प्रतिसप्ताहं यदा कक्ष्यारम्भः भवति तदा सः कलामवर्येण कियत् ज्ञातम् इति विविधैः प्रश्नैः अवगच्छति स्म। कलामवर्यः वदति– 'उत्तमः बोधकः एव एतादृशं परिश्रमं वोढुम् अर्हति' इति। षण्णां सप्ताहानाम् अनन्तरं कलामवर्यः आत्मना अपेक्षितस्य यन्त्रभागस्य निर्माणसम्बद्धं तन्त्रज्ञानम् आसादितवान्।

अनन्तरकाले यदा डा. धवनवर्यः 'इसरो' संस्थायाः मुख्यः आसीत् तदा एस्.एल्.वि.सरण्याः रोहिणीनामिकायाः बाह्याकाशनौकायाः निर्माणे सहभागिताप्राप्तेः अवसरम् अपि कलामवर्यः प्राप्तवान् आसीत्। गतानि दिनानि स्मरन् आत्मना पितुः सकाशात् मानवीयमौल्यानि कथं प्राप्तानि इति, शिवसुब्रह्मण्यसदृशः अध्यापकः कथं छात्राणाम् अनुकरणपात्रतां वोढुं शक्नोति इति, अध्यापनसमये या सुपरिष्कृतता अवलम्ब्येत सा अध्येतरि आत्मविश्वासम् आत्मशक्तिं च वर्धयति इति च अस्मान् स्मारयति। यदि शिक्षकाः दीपायेरन् तर्हि ते अनेकान् दीपान् प्रवर्तयेयुः।

**(आकाशवाणीभाषणात् उद्धृतम्)**

# निसर्गे निहितः अपूर्वः आनन्दसन्दोहः

सुन्दरः उषः कालः। ऋतुवैशिष्ट्यकारणतः तस्य शान्तता प्रवृद्धा दृश्यते। १५० वर्षेभ्यः पूर्वं भारतस्य सर्वेषु अपि ग्रामेषु प्रायः एतादृशं दृश्यं दृश्यते स्म। पक्षिणां कलरवात् ऋते अन्यः ध्वनिः प्रायः न श्रूयते स्म। शुनकानां भषणं, धेनुवृषभादीनां ध्वनिः, मानवानां सम्भाषणं च विरलतया एव श्रूयते स्म तत्र। यन्त्राणां, दूरवाणीनाम्, आकाशवाणीनां, चलनचित्राणां च उपस्थितिः न आसीत् तदा।

कश्चन षड्वर्षीयः बालकः व्रीहिक्षेत्रे पदं स्थापयन् गच्छन् आसीत्। सः शान्तिप्रियः। हरिन्मयता तस्मै विशेषतः रोचते। सः वृक्षान् श्रद्धया पश्यन् वृष्टेः आगमनं सम्भावयन् गच्छन् आसीत्। तावता मेघध्वनिः आकाशे उत्पन्नः। सर्वासु दिक्षु सः प्रसृतः जातः।

क्षणाभ्यन्तरे तेन ध्वनिना समग्रः आकाशः प्रतिध्वनितः जातः।

सः बालकः गमनं स्थगयित्वा सृष्टिवैचित्र्यं ध्यायन् दिगन्ते स्वस्य दृष्टिं प्रसारितवान्। 'अहो सृष्टिवैचित्र्यम्!' इति अवदत् तदीयं मनः। तत्र उत्पन्नः शीतलः वायुः तस्मिन् रोमाञ्चम् अजनयत्। पर्णानां मर्मरध्वनिः मधुरसङ्गीतम् इव प्रत्यभासत। 'अहो, जगतः आनन्दमयता!' इति अचिन्तयत् सः।

तावता आकाशे डयमानाः पक्षिणः तस्य आनन्दम् इतोऽपि अवर्धयन्। आकाशः मेघानां कारणतः क्वचित् कृष्णः, क्वचित् नीलः च प्रतिभासते स्म। तादृशे आकाशे श्वेतवर्णीयानां बलाकानां सञ्चारः! 'हे भगवन्! एतत् वर्णनानीतं सौन्दर्यम् अधिग्रहीतुं न मम सामर्थ्यम्। एतत् वैशिष्ट्यं कथम् अहम् उपवर्णयेयम्?' इति स्वगतम् अवदत् सः।

सः बालकः सर्वं पश्यन् भगवतः अचिन्त्यलीलाम् अवधारयन् तत्रैव अचेतनः सन् अपतत्। मृदूनां तृणानाम् उपरि पतितः आसीत् सः। तावता तेन मार्गेण केचन ग्रामीणाः आगताः। ते तं बालम् अभिजानन्ति स्म। तस्य वैशिट्यम् अपि जानन्ति स्म ते। अतः ते तम् उन्नीय ग्रामम् अनयन्।


सः बालः एव गदाधरनामा। बङ्गालप्रदेशे कमारपुकुरनामके ग्रामे तस्य जन्म। गच्छता कालेन सः एव श्रीरामकृष्णपरमहंसनाम्ना (१८३६-१८८६) ख्यातः जातः। तस्मिन् प्रातःकाले तेन प्राप्ता स्थितिः एव 'समाधिस्थिति' नाम्ना निर्दिश्यते। योगस्य साहाय्येन अपि सा स्थितिः प्राप्तुं शक्या। किन्तु गदाधरस्य जीवने सा च स्थितिः सहजा आसीत्। तदनन्तरकाले तेन सा स्थितिः बहुवारं प्राप्ता। तस्यां समाधिस्थितौ असीमः आनन्दः अनुभूयते। इहप्रपञ्चज्ञानम् इच्छादयः वा न भवन्ति तदा समाधिस्थितियुक्ते जने।

सूर्योदये, सूर्यास्ते, पुष्पविकासे, आकाशे, नक्षत्रे, तादृशेषु अन्येषु चापि असीमं सौन्दर्यम्, अपारः आनन्दः च निहितः भवति। किन्तु तस्य दर्शनाय अनुभवाय च सामर्थ्यविशेषः अपेक्ष्यते। विलियं ब्लेक्नामकः आंग्लकविः (१७५७-१८२७) तम् आनन्दम् अधिकृत्य वदति – "यदा भवान् सिकताकणे जगत् द्रष्टुं शक्नुयात्, पुष्पविकासे स्वर्गं द्रष्टुं प्रभवेत्, करतले जगतः वैशाल्यं ग्रहीतुं समर्थो भवेत्, क्षणे अनन्ततां द्रष्टुं शक्तो भवेत्, तर्हि अपारः आनन्दः भवदीयः भवेत्" इति।


रामकृष्णपरमहंसप्रभृतयः महात्मानः एतस्य कृतिसाध्यतां स्वीयेन जीवनेन निरूपितवन्तः सन्ति।

# मासवार्ता:

## सम्पन्नः अष्टमः पदवीदानसमारम्भः





एकलव्य-संस्कृत-एकेडेमीसंस्थानस्य अष्टमः पदवीदानसमारम्भः जान्युआरीमासस्य २७ दिनाङ्के सम्पन्नः । समारम्भेऽस्मिन् 'डिप्लोमा इन संस्कृतटिचिंग' इति अभ्यासक्रमे प्रशिक्षितेभ्यः छात्रेभ्यः डॉ. कमलेशकुमार चोकसीमहोदयस्य (अध्यक्षः, संस्कृतविभागः, भाषा-साहित्य-भवनम्, गुजरातविश्वविद्यालयः) करकमलाभ्यां पदवीप्रदानम् अभवत्। अभ्यासक्रमोऽयं श्रीसोमनाथसंस्कृतविश्वविद्यालयेन सह संलग्नः वर्तते।

प्रसङ्गेऽस्मिन् संस्कृतभाषायाः संस्कृतसाहित्यस्य च महत्त्वं संस्कृतपाठनक्रमस्य उदाहरणानां माध्यमेन संस्कृतरसिकानां पुरतः सुचारुतया उपस्थापत् आदरणीयः चोकसीमहाभागः । कश्चन एकः एव विषयः संस्कृतभाषायां स्थितेन ज्ञानेन कथं विविधेषु सोपानेषु छात्राणां स्तरानुगुणं पाठयितुं शक्यते इति सोदाहरणं सरलतया विवृणोत् डॉ. कमलेशमहोदयः । संस्कृतवाङ्मयस्य प्रत्येकं शब्दः एकं शास्त्रं वर्तते इति कथनमासीत् डॉ. कमलेशचोकसीमहोदयस्य । कार्यक्रमेऽस्मिन् एकलव्य-एक्युकेशन-फाउन्डेशन एवम् एकलव्य -संस्कृत-एकेडेमीसंस्थानस्य अध्यक्षः श्री सुनीलः हाण्डामहोदयः उपस्थाय सर्वेषाम् उत्साहम् अवर्धयत् । प्रसङ्गेऽस्मिन् एकलव्य-संस्कृत-एकेडेमीसंस्थाने आयोजितेषु विविधेषु अभ्यासक्रमेषु संस्कृतस्य अध्ययनं कृतवद्भ्यः छात्रेभ्यः अपि प्रमाणपत्रप्रदानम् अभवत्। प्रमाणपत्रं प्राप्य सर्वे छात्राः आनन्दिताः आसन्।

## कृपया हसन्तु

रमण: - (नमनं प्रति) अगस्तमासस्य १५ दिनाङ्के अस्माभि: किं कर्तव्यम् ?

नमन: - अधिकं किमपि न, पितृभ्यां सह अस्माकं स्वतन्त्रताया: विषये चर्चा कर्तव्या ।

★ ★ ★ ★ ★

रमणस्य परिणामपत्रं दृष्ट्वा तस्य पिता कोपेन रमणाय अकथयत् – "भवादृशा: छात्रा: पृथिव्यां भाररूपा: सन्ति ।"

रमण: - भो: पित:! चिन्ता मास्तु । अत: एव अहं वायुयानचालक: भवितुम् इच्छामि ।

★ ★ ★ ★ ★

शिक्षक: - (छात्रान् उद्दिश्य) कस्मिन् पदार्थे 'विटामीन सी' सर्वाधिकं भवति ?

छात्र: - मरीचिकायाम् ।

शिक्षक: - तत् कथम् ?

छात्र: - कारणं मरीचिकां खादित्वा सर्वे 'सी... सी... सी...' इति सीत्कारं कुर्वन्ति ।

## अहो चातुर्यम्

– संस्कृतविकिपिडीयाजालस्थानात्

**अंङ्गुल्या क: कवाटं प्रहरति कुटिले माधव: किं वसन्त:**
**नो चक्री किं कुलालो न हि धरणिधर: किं द्विजिह्व: फणीन्द्र: ।**
**नाहं घोराहिमर्दी किमुत खगपति: नो हरि: किं कपीन्द्र:**
**इत्येवं सत्यभामाप्रतिवचनजित: पातु वश्चक्रपाणि: ॥**

कदाचित् कृष्ण: सत्यभामाया: अन्तर्गृहद्वारे शब्दं कृतवान् । तदा सत्यभामा तम् अपृच्छत्– 'क: द्वारे शब्दापयति?' कृष्ण: अवदत्– 'अहं माधव: ।' माधव: इत्यस्य वसन्तऋतु: इत्यर्थं कल्पयित्वा सत्यभामा अवदत्– 'भवान् वसन्त: वा ?' कृष्ण: अवदत्– 'अहं चक्री ।' सुदर्शनचक्रं तस्य अस्ति । अत: स: चक्री । परन्तु कुलालस्य निकटे अपि चक्रं भवति । घटस्य निर्माणे स: चक्रस्य उपयोगं करोति । अत: सत्यभामा 'भवान् कुलाल: किम् ?' इति पृच्छति । अहं धरणिधर: इति कृष्ण: उक्तवान् । स: भूमिम् उद्धृतवान् आसीत् । परन्तु सत्यभामा भूभारं वहन्तम् आदिशेषं स्मृत्वा 'किं भवान् आदिशेष: ?' इति पृच्छति । तदा तु कृष्ण: 'अहं घोरस्य सर्पस्य मर्दनकर्ता' इति अवदत् । कालियमर्दनं तु तेन कृतमेव । परन्तु सत्यभामा अवदत्– 'सर्पनाशक: गरुड: किम् ?' 'नैव भो:, अहं हरि:' इति कृष्ण: अवदत् । 'हरि:' इत्यस्य कपि: इत्यर्थं गृहीत्वा सत्यभामा 'किं त्वं कपि: ?' इति अपृच्छत् । एवं सत्यभामया य: जित: स: कृष्ण: भवत: सर्वान् रक्षतु ।

# ज्ञानसरिता

## कीटभक्षकं सस्यम्



किं सस्यानि कीटादीन् खादितुम् अर्हन्ति ?

आम् । पुटग्रीवादीनि सस्यानि कदाचित् तैलपादीन् कीटान् खादन्ति । यथा नाम एव सूचयति तथा तस्य सस्यपुष्पस्य आकारः कण्ठस्य इव भवति । एतस्य अग्रभागे पर्णसदृशः भागः भवति ।

पुष्पस्य उदरे कश्चन द्रवः भवति । यः कीटः पुष्पोदरं प्रविशति तस्य शरीरात् जीवसत्त्वं ग्रहीतुं समर्थः भवति स च द्रवः ।

पुटग्रीवसस्ये प्रकारद्वयं दृश्यते । एकः प्रकारः भूमौ प्रसरति । अपरः वृक्षम् आलिङ्ग्य वर्धते । यत् भूमौ प्रसरति तत्रापि पुष्पप्रकारद्वयम् । कानिचन पुष्पाणि भूमिं स्पृशन्ति, पुनः कानिचन घण्टाकारेण ऊर्ध्वमुखतया वर्धन्ते ।

यदा पुटग्रीवपुष्पं पूर्णतया विकसितं भवति तदा एव पुष्पस्य उपरि स्थितम् आवरणम् उद्घाटितं भवति । पुष्पमुखस्य उद्घाटनस्य अनन्तरम् आवरणं पुनः चलनसमर्थं न भवति । पुष्पोदरे मकरन्दशलाकानां मध्ये मकरन्दस्य उत्पत्तिः भवति ।

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **विबुद्धः** | जागरूक | awake |
| **विबुधः** | विद्वान् | learned |
| **विबोधः** | जागना | awakening |
| **विभक्तः** | बाँटा हुआ | divided |
| **विभङ्गः** | टूटना | breaking |
| **विभवः** | सम्पत्ति | wealth |
| **विभा** | प्रकाश | light |
| **विभाकरः** | सूर्य | the sun |
| **विभावरी** | रात | night |
| **विभाषा** | विकल्प | option |
| **विभीषकः** | डरावना | terrible |
| **विभुग्नः** | झुका हुआ | curved |
| **विभूतिः** | महिमा | dignity |
| **विभूषणम्** | सजावट | decoration |
| **विभ्रंशः** | गिरना | falling |

## किं भवन्तः जानन्ति ?

**१ ) गीतोपदेशे कृष्णः आत्मानं कं वृक्षम् अकथयत् ?**
(क) वट (ख) अश्वत्थ (ग) कदम्ब (घ) अशोक

**२ ) सञ्जयाय दिव्यदृष्टिः केन प्रदत्ता आसीत् ?**
(क) वेदव्यासेन (ख) कृष्णेन (ग) दुर्वाससा (घ) सूर्येण

**३ ) महाप्रस्थानसमये पाण्डवैः सह द्रौपद्या सह कः आसीत् ?**
(क) कुन्ती (ख) श्वानः (ग) सुभद्रा (घ) धौम्यः

**४ ) इन्द्रप्रस्थे जलस्थलयोः भेदं ज्ञातुम् असमर्थः कः जले अपतत् ?**
(क) शकुनिः (ख) दुर्योधनः (क) कर्णः (घ) दुःशासनः

**५ ) हस्तिनापुरनरेशस्य विचित्रवीर्यस्य मृत्युः केन रोगेण जातः आसीत् ?**
(क) क्षय (ख) उदरशूल (ग) अर्बुद (घ) पाण्डु

**६ ) अद्यतन 'शतरञ्ज' इति क्रीडायाः महाभारतकाले किं नाम आसीत् ?**
(क) द्यूत (ख) नवरङ्ग (ग) चतुरङ्ग (घ) प्रहारम्

**७ ) द्रौणद्रुपदौ कस्य आश्रमे शिक्षणं प्राप्तवन्तौ ?**
(क) परशुरामस्य (ख) भरद्वाजस्य (ग) सान्दीपनेः (घ) अग्निवेश्यस्य

उत्तराणि – (१) ख (२) क (३) ख (४) ख (५) क (६) ग (७) घ

## अस्माकम् आगामिकार्यक्रमाः

# Taste of Sanskrit Literature

## ( विदुरनीतिः )

- **Date** : 6/03/18 to 26/04/18
- **Day** : Tuesday - Thursday
- **Time** : 2:00pm to 3:30pm
- **Fees** : 1200/-
- **Venue** : Eklavya Sanskrit Academy 'Sanskutam', 54, Giriraj Soc. Vibhag 2, Opp. Shivanand Flat, Nr. Calorx School, Ghatlodia Ahmedabad - 380061
- **Contact:** Dr. Mihir Upadhyay, Mobile: 98246 16237

## Value Education Through Sanskrit

## बालसंस्कारकेन्द्रम्

(Class SKg to 4)

## बालसंस्कृतशिबिरम्

(Class 5 to 8)

- **Date** : 10/06/18 to 14/04/19
- **Day** : Sunday
- **Time** : 11:00am to 12:30pm
- **Fees** : 3500/-
- **Venue** : Eklavya Sanskrit Academy Core House, Opp. Apollo city centre Nr. Parimal Garden, Ahmedabad - 380006
- **Contact:** Dr. Mihir Upadhyay, Mobile: 98246 16237

## संस्कृत-साम्प्रतम्

नमस्कारः

यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | - 100 |
| द्वैवार्षिकं रू | - 175 |
| त्रैवार्षिकं रू | - 250 |
| अङ्कमूल्यं रू | - 10 |

## Eklavya Sanskrit Academy

## छन्दःपरिचयः

**Date** : 9/2/18 to 16/3/18
**Day** : Wednesday, Friday
**Time** : 6:30 pm to 8:00 pm
**Fees** : 1000/-

**Venue:** Core House, Off CG Road, Ah'bad
**Contact :** Dr. Mihir Upadhyay - (91) 098246 16237

**प्रियवाचकाः**

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY

|| जयतु संस्कृतं जयतु भारतम् ||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006